# INDIAN SCHOOL AL WADI AL KABIR

| Class: IX | Department: Sanskrit | Date of submission: NA |
|---|---|---|
| Worksheet | Topic: अपठित गद्यांश | Note: Pl. file in portfolio |

**1. अधोलिखितम् गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत।**

एकदा एकः वैदेशिकः प्रथम-राष्ट्रपतेः श्रीराजेन्द्र प्रसादस्य गृहं प्राप्तवान् । राष्ट्रपतेः परिचारकः तं आतिथ्यगृहे प्रतीक्षितुम् अकथयत् तम् असूचयत् च यद् राष्ट्रपतिमहोदयः सम्प्रति पूजां करोति । स अतिथिः ज्ञातुम् ऐच्छत् यद् राष्ट्रपतिः कथं करोति पूजाम् ? सङ्कोचं कुर्वन् अपि स अन्तः पूजागृहं प्रविष्टः । राष्ट्रपतेः समक्षं विद्यमानं मृत्पिण्डं सोऽवन्दत श्रद्धया च तत्र उपाविशत् । पूजां परिसमाप्य राष्ट्रपतिमहोदयः पूजागृहे स्थितं तं दृष्ट्वा प्रसन्नः अभवत्, ससम्मानं तम् अन्तः अनयत् । आगन्तुकस्य ललाटे विद्यमानं भावं दृष्ट्वा श्रीराजेन्द्रप्रसादमहोदयः तस्य कौतूहलं विज्ञाय तस्मै सम्बोधयत् - एतद् मृत्पिण्डं भारतस्य भूम्याः प्रतीकम् अस्ति। एतेन मृत्पिण्डेन एव भारतीयाः महतीम् आध्यात्मिकां सम्पदं प्राप्नुवन्ति । अत एव वयं मृत्तिकायाः कणेषु ईश्वरस्य दर्शनमपि कुर्मः । अस्माकं विचारे तु मानवेषु, पशुपक्षिषु, पाषाणेषु, वृक्षादिषु किं वा अचेतनेषु अपि ईश्वरस्य सत्ता अस्ति ।

**I. एकपदेन उत्तरत-**

(i) कः श्रीराजेन्द्रप्रसादस्य गृहं प्राप्तवान्?  (ii) भारतभूम्याः प्रतीकम् किम् अस्ति?

**II. पूर्णवाक्येन उत्तरत-**

(i) राष्ट्रपतिमहोदयः आगन्तुकं कुत्र दृष्ट्वा प्रसन्नः अभवत् ?

(ii) राजेन्द्रप्रसादमहोदयः आगन्तुकस्य कौतूहलं विज्ञाय तस्मै किं सम्बोधयत् ?

**III. भाषिककार्यम् -**

(i) 'प्राप्नुवन्ति' अस्याः क्रियायाः कर्तृपदं किम् ?

(क) महतीम्  (ख) सम्पदम्  (ग) मृत्पिण्डेन  (घ) भारतीयाः

(ii) 'भावम्' इति विशेष्यस्य अत्र किं विशेषणम् वर्तते ?

(क) विद्यमानम्  (ख) ललाटे  (ग) कौतूहलम्  (घ) प्रतीकम्

(iii) 'चिह्नम्' अस्य कः पर्यायः अत्र प्रयुक्तः ?

(क) प्रतीकम्  (ख) भावम्  (ग) मृत्पिण्डम्  (घ) पिण्डम्

****** OOO ******

2. **अधोलिखितम् गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत।**

भारते प्रतिषड्वर्षं प्रयागे कुम्भार्धकुम्भनामके महामेलके भवतः । एतयोः मेलकयोः सर्वस्मात् भारतात् जनाः अत्र आगच्छन्ति । तत्र महामेलके विभिन्नाः व्यवस्थाः यात्रिणां कृते क्रियन्ते। जनैः अपि ज्ञातव्यं यत् मेलकं गत्वा सुविधायाः अपेक्षा न करणीया। तत्र जनसम्मर्दनेन असुविधाः अपि सम्भवेयुः । जनः मेलामागत्य पूर्वं संगमे यथाकालं स्नानं कुर्यात्, ततः सत्यवसरे पटकुट्यां निवसेत् । मातरं पितरं भ्रातरमपि सहैव आनयेत् । सात्विकमाहारं खादेत् । मध्याह्ने मेलास्थितं हट्टम् गच्छेत्, आपणेभ्यः आवश्यकं कालोचितं वस्तु क्रीणीयात् । ततः सायं साधूनां, विदुषां महात्मनां चोपदेशान् शृणुयात्, नाट्यमण्डलीनां मधुरां रासलीलां पश्येत् मन्दिरं वा गच्छेत्। ततः जनः ग्रामे नगरे वा बन्धुभ्यः मित्रेभ्यः परिचितेभ्यः च वितरणार्थं प्रसादम् अवश्यमानयेत् । तस्यां मेलायां किमपि निषिद्धं कार्यं न करणीयम् यथा कोऽपि नद्यां वर्जितस्थाने न स्नातु, धूम्रपानादिकं न करोतु, अस्त्रादिकम् न निदधातु, आयुधं न रक्षतु, उच्चैः न वदतु, केनापि सह विवादं न करोतु । आवश्यके सति राजपुरुषाणां साहाय्यं सर्वः स्वीकरोतु ।

**1. एकपदेन उत्तरत-**

(i) जनः महामेलके कुम्भे कुत्र निवसेत्?        (ii) मेलायां जनः किं न निदधातु?

**II. पूर्णवाक्येन उत्तरत-**

(i) जनैः किं ज्ञातव्यम्?        (ii) जनः महामेलकात् किमर्थं प्रसादम् आनयेत्?

**III. भाषिककार्यम्-**

**(i) अनुच्छेदे 'व्यवस्थाः' इति विशेष्यस्य विशेषणं किं लिखितम्?**

(क) सुविधायाः        (ख) महामेलके        (ग) विभिन्नाः        (घ) जनाः

**(ii) 'भोजनम्' इत्यस्य पदस्य कः पर्यायः अनुच्छेदे प्रयुक्तः?**

(क) आहारम्        (ख) सात्विकम्        (ग) मेलाम्        (घ) मेलकम्

**(iii) 'जनः' इति कर्तृपदस्य क्रियापदं किम्?**

(क) प्रसादम्        (ग) आनयेत्        (ख) ततः        (घ) अवश्यमानयेत्

IV. अस्य अनुच्छेदस्य उचितं शीर्षकं लिखत ।